रमानाथः ॥ व्यवहारः । कस्यचित् प्रकर्षः । इति तत्रैव भरतः ॥ विजयेच्छा च ॥ ( यथा, कथासरित्सागरे । ३६ । ७१ ।
"द्वारे विधिमिवान्यं तत्तद्दृष्ट्वा विजिगीषया ।
आगतं पुरुषं कश्चिद्ददर्शाश्चर्य्यदायकम् ॥" )

विजिगीषाविवर्ज्जितः, त्रि, ( विजिगीषया विवर्ज्जितः । ) केवलमुदराधीनः । तत्पर्य्यायः । आद्यूनः २ औदरिकः ३ । इत्यमरः ॥ विजिगीषा व्यवहारः कस्यचित् प्रकर्षो वा तेन विवर्ज्जितो विहीनो यः केवलमुदराधीनः तत्र द्वाविमौ वर्त्तेते इत्यर्थः । जिगीषा जेतुमिच्छायां व्यवहारप्रकर्षयोः । इति मेदिनी ॥ तत्र स्वोदरपूरणाशक्तिनिमित्तकनिन्दात्यागेच्छा विजिगीषा तया रहिते द्वयमिति रमानाथः । इति तट्टीकायां भरतः ॥

विजिगीषुः, त्रि, ( विजेतुमिच्छुः । वि + जि + सन् + "सनाशंसभिक्ष उः ।" ३ । २ । १६८ । इति उः । ) जयेच्छाशीलः । यथा,—
"जेतुमेषणशीलस्य विजिगीषुरिति स्मृतः ॥"
इति शब्दमाला ॥
( यथा, कामन्दकीयनीतिसारे । ८ । ३ ।
"रोचते सर्व्वभूतेभ्यः शशीवाखण्डमण्डलः ।
सम्पूर्णमण्डलस्तस्माद्विजिगीषुः सदा भवेत् ॥" )

विजितः, त्रि, ( विशेषेण जितः । ) पराजितः । यथा,—
"पथ्याशिनां शीलवतां नराणां
सद्वृत्तिभाजां विजितेन्द्रियाणाम् ।
एवं विधानामिदमायुरत्र
चिन्त्यं सदा वृद्धमुनिप्रवादः ॥"
इति मलमासतत्त्वम् ॥

विजिला, [ ऌ ] त्रि, ( विज + इलच् । ) पृथक् । भीतः । कम्पितः । इति विजधात्वर्थदर्शनात् ॥

विजितिः, स्त्री, ( वि + जि + क्तिन् । ) विजयः । यथा,—
"क्षितिविजितिस्थितिविहितिव्रतरतयः परगतयः ।
उरुरुरुधुर्गुरु दुधुवुर्युधि कुरवः स्वमरिकुलम् ॥"
इति दण्डी ॥

विजिनं, त्रि, विजिलम् । इत्यमरटीकायां रायमुकुटः ॥

विजिलं, त्रि, ईषत् सरसव्यञ्जनादि । तत्पर्य्यायः । पिच्छिलम् २ । इत्यमरः ॥ विजयिनम् ३ विजिनम् ४ विज्जलम् ५ उज्ज्वलम् ६ लालसीकम् ७ । इति वाचस्पतिः ॥ विजिविलम् ८ विजलम् ९ । इति हेमचन्द्रः ॥
"पाकरूपरसासक्तं व्यञ्जनं तु भवेत् त्रयम् ।
तैलपाकसुसंस्कारे प्रायस्तमुपसंस्कृतम् ।
पिच्छिलं लालसीकञ्च विजिलं विज्जिलञ्च तत् ॥"
इति शब्दरत्नावली ॥

विजिविलं, त्रि, विजिलम् । इति हेमचन्द्रः ॥

विजिह्मः, त्रि, ( विशेषेण जिह्मः । ) वक्रः । कुटिलः । इति केचित् । ( यथा, रघुः । १६ । ३५ ।
"शिल्पकार्य्य उभयेन वेजिता-
स्तं विजिह्मनयना व्यलोभयन् ॥" )

विजुलः, पुं, शाल्मलीकन्दः । इति राजनिर्घण्टः ॥

विजृम्भणं, क्ली, ( वि + जृम्भ + ल्युट् । ) जृम्भणम् । ( यथा, सुश्रुते । ५ । २ ।
"निद्रागुरुत्वञ्च विजृम्भणञ्च
विश्लेषहर्षाविथवाङ्गमर्द्दः ॥")
विकसनम् । इति केचित् ॥ ( यथा, रघुः । १६ । ४७ ।
"वनेषु सायन्तनमल्लिकानां
विजृम्भणोद्गन्धिषु कुड्मलेषु ॥"
कम्पनम् । सङ्कोचः । यथा, भागवते । ७ । ५ । ४९ ।
"जितं त्वयैकेन जगत्त्रयं भ्रुवो-
र्विजृम्भणत्रस्तसमस्तधिष्ण्यपम् ॥")

विजृम्भितं, क्ली, ( वि + जृम्भ + क्तः । ) चेष्टा । इति मेदिनी । ते, २१७ ॥ ( यथा, कथासरित्सागरे । ४ । १३ ।
"अथागत्य समाख्यातं तत्सख्या मन्त्रिवन्धनम् ।
उन्नाढ़सुपकेशाया नवानङ्गविजृम्भितम् ॥")

विजृम्भितः, त्रि, ( वि + जृम्भ + क्तः । ) विकस्वरः । इति मेदिनी । ते, २१७ ॥ यथा, भागवते । ४ । २१ । ८ ।
"तदादिराजस्य यशो विजृम्भितं
गुणैरशेषैर्गुणवत्सभाजितम् ॥"
व्याप्तः । यथा, रघुः । ७ । ४२ ।
"आवृण्वतो लोचनमार्गमाजौ
रजोऽन्धकारस्य विजृम्भितस्य ॥"॥
विजृम्भा सञ्जाता अस्येति । तारकादित्वादितच् । ) जृम्भायुक्तश्च ॥ ( यथा, हरिवंशे । १८९ । ६ ।
"सशरं सधनुष्कञ्च दृष्ट्वात्मानं विजृम्भितम् ।
ततो ननाद भूतात्मा स्निग्धगम्भीरनिःस्वनः ॥")

विज्जनं, त्रि, विजिलम् । इत्यमरटीकायां रायमुकुटः ॥

विज्जलं, क्ली, बाणम् । यथा,—
"पत्रवाहो विकर्षोऽथ तीरं विज्जलशायके ।
लोहनालस्तु नाराचः प्रसरः काण्डगोचरः ॥"
इति त्रिकाण्डशेषः ॥
त्रि, विजिलम् । इति हेमचन्द्रः ॥ ( यथा, वृहत्संहितायाम् । ५५ । २९ ।
"श्लेष्मातकस्य बीजानि
निष्कुलीकृत्य भावयेत् प्राज्ञः ।
अङ्कोल्लविज्जलाद्भि-
श्छायायां सप्तकृत्वेवम् ॥")

विज्जिलं, त्रि, विजिलम् । इति शब्दरत्नावली ॥

विज्जुलं, क्ली, त्वचम् । इति राजनिर्घण्टः ॥

विज्जुलिका, स्त्री, जतुका । इति राजनिर्घण्टः ॥

विज्ञः, त्रि, ( विशेषेण जानातीति । वि + ज्ञा + "आतश्चोपसर्गे ।" इति कः । ) प्रवीणः । इत्यमरः ॥ ( यथा, भागवते । ६ । १६ । ६१ ।
"एवं विपर्य्ययं बुद्धा नृणां विज्ञाभिमानिनाम् ।
आत्मनश्च गतिं सूक्ष्मां स्थानत्रयविलक्षणाम् ॥")
अस्य पर्य्यायो निपुणशब्दे द्रष्टव्यः ॥ पण्डितः । इति राजनिर्घण्टः ॥ (यथा, नैषधे । ३ । ९६ ।
"विज्ञेन विज्ञाप्यमिदं नरेन्द्रे
तस्मात्त्वयास्मिन् समयं प्रतीक्ष्य ।
आत्यन्तिकासिद्धिविलम्बसिद्धोः
कार्य्यस्य कार्य्यस्य शुभा विभाति ॥")

विज्ञबुद्धिः, स्त्री, जटामांसी । इति शब्दचन्द्रिका ॥

विज्ञातः, त्रि, (वि + ज्ञा + क्तः । ) ख्यातः । इत्यमरः ॥ ( विदितः । यथा, हरिवंशे । १६५ । १७ ।
"विज्ञातोऽसि मया चिह्नैर्विना चक्रं जनार्द्दन ॥")

विज्ञानं, क्ली, ( वि + ज्ञा + ल्युट् । ) ज्ञानम् । कर्म्म । इति मेदिनी । ने, ११३ ॥ कार्म्मणम् । इति हेमचन्द्रः ॥
"मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः ॥"
इत्यमरः ॥
"विशेषेण सामान्येन चावबोधो मोक्षो मुक्तिः शिल्पं चित्रादिशास्त्रं व्याकरणादि । मोक्षे शिल्पे शास्त्रे च या धीः सा ज्ञानं विज्ञानञ्चोच्यते एषा विशेषप्रवृत्तिः । अन्यत्र घटपटादौ या धीः सापि ज्ञानं विज्ञानञ्चोच्यते । एषा सामान्यप्रवृत्तिः । मोक्षे धीर्ज्ञानं विज्ञानञ्च यथा । ज्ञानान्मुक्तिरिति । सा याचिता च विज्ञानं तुष्टा ऋद्धिं प्रयच्छति इति । अन्यच्च यथा । ज्ञानमस्ति समस्तस्य जन्तोर्विषयगोचरे इति । घटत्वप्रकारकज्ञानमिति । ये केचित् प्राणिनो लोके सर्व्वे विज्ञानिनो मता इति । ब्रह्मणो नित्यविज्ञानानन्दरूपत्वात् इति । एवं चित्रज्ञानं व्याकरणज्ञानं घटपटविज्ञानमित्यादिकं प्रयुज्यत एव । तद्विगमे गरुत्मदादिशब्दवत् गरुत्मच्छब्दो हि गरुड़े पक्षिमात्रे च वर्त्तते । मोक्ष इति निमित्तसप्तमी मोक्षनिमित्तं शिल्पशास्त्रयोर्धीर्ज्ञानमुच्यते । तन्निमित्ततोऽन्यनिमित्तं या तयोर्धीः सा विज्ञानमिति केचित् । मोक्षविषया मोक्षफला धीर्ज्ञानं अन्यधीर्व्विज्ञानम् । क्वान्यत्र इत्याह शिल्पशास्त्रयोरिति केचित् । अवबोध इत्यध्याहृत्य मोक्षविषयेऽवबोधो धीर्ज्ञानं अन्यत्र घटपटादिविज्ञानं शिल्पशास्त्रविषये विज्ञानमिति केचित् । जानातेरनट् ज्ञानं विविधं विरूपं वा ज्ञानं विज्ञानम् ।" इत्यमरटीकायां भरतः ॥*॥
तत्तु ब्राह्मणस्य लक्षणविशेषः । यथा,—
"क्षमा दया च विज्ञानं सत्यञ्चैव दमः शमः ।
अध्यात्मनिरता ज्ञानमेतद्ब्राह्मणलक्षणम् ॥"
ज्ञानविज्ञानयोर्लक्षणं यथा,—
"चतुर्द्दशानां विद्यानां धारणं हि यथार्थतः ।
विज्ञानमितरं विद्याद्येन धर्म्मो विवर्द्धते ॥
अधीत्य विधिवद्विद्यामर्थञ्चैवोपलभ्य तु ।
धर्म्मकार्य्यान्निवृत्तश्चेन्न तद्विज्ञानमिष्यते ॥
यया स देवो भगवान् विद्यते यत्र विद्यते ।